वेति। सर्वाणि परिहृतानि न सर्वाणि परिहृतानि पंचकुमारिर्दशकुमारि लुक् तद्धि
लुकीति निङीपो लुक् तत्र सत्येजाद्वेद्वजन्तु तस्य योतत्र पदे निसमासवृत्ते दंद्वजन्तुन तस्यो राम
न तत्र पदे नित्य समासो वक्तव्यः। वाग्दृषदाश्रियः। छत्रोपानहाश्रियः। दशगवाश्रियः। किं

303

डांग्रथवा पुनरस्त्वन्ञोऽनन्तरे कथं प्रवहोतारः दृष्टाहोतारः आद्युदात्तप्रकरणो दिवोदासादीनां छ
न्दस्येव सिद्धं।संख्या॥ ॥कुत्सितानि कुत्सनैः॥ ॥किमुदाहरणं वैयाकरणखसूचिः। किं व्याकर
णं कुत्सितमाहोस्विद्वैयाकरणः। वैयाकरणः कुत्सितः। तस्मिन्कुत्सिते तत्स्थमपि कुत्सितं भव
ति कुत्सिता॥ छ॥ उपमानानि सामान्यवचनैः॥ छ॥ उपमानानीत्युच्यते कानि पुनरुपमाना
नि किं यदेवोपमानं तदेवोपमेयं आहोस्विदन्यदुपमानमन्यदुपमेयं। किं चातः। यदि यदेवो
पमानं तदेवोपमेयमेकस्येहोपमार्थः गौरिव गौरिति। अथान्यदेवोपमानमन्यदुपमेयमेकस्येहोप
मार्थः गौरिवाश्व इति। एवं तर्हि यत्र किंचित्सामान्यं कश्चिच्च विशेषस्तत्रोपमानोपमेये भवतः
किं पुनस्तन्मानं आह कथमनुष्यमानं गंस्यते॥ मानं हि नाम अनिर्ज्ञातज्ञानार्थमुपादीयते अ
निर्ज्ञातमर्थं ज्ञास्यामीति। तत्समीपे यन्नात्यन्ताय मिमीते तदुपमानं। गौरिव गवय इति गौ-
निर्ज्ञातः गवयोऽनिर्ज्ञातः कामं न तर्हि नेनैव हेतुना यस्य गवयो निर्ज्ञातः स्यात्तं गौरनिर्ज्ञातः ते

भा०

नकर्त्तव्येत्यानुगावयद्दवगौरिति बाढं कर्त्तव्यं। किंपुनरिहोदाहरणं। शाब्वा इत्यामा। कः पुनरयं इत्याम
शाब्वो वर्त्तते शाब्बामित्याह। केनेदानीं देवदत्ता मिमीयते। समासेन। यथैव शाब्वी इत्यामो देवदत्त
इति न सिध्यति उपसङ्ख्यानस्येति ह्येवमविष्यति यदि तर्हि उपसङ्ख्याना न्यत्वेऽनातायकानि
मवेति निमित्तिरिकल्मासशीकुम्भकपाललोहितो अनुपसङ्ख्यानलक्षणाईकारेण प्राप्नोति। ए
वं तर्हि शाब्बामेव शाब्बा शाब्वो वर्त्तते देवदत्तायां इत्यामा शाब्बः। एतमपि द्युणाः श्रेणि हि द्रोमव
ति बहवः शौक्ल्यं गुणाः तो स्या समस्या ष्टद्युरिति। अनिर्दिश्यमानस्यापि गुणस्य भवति लोके सं
प्रत्ययः न यथा वै इक्षु क्षीरे देवदत्तेति। बहवः वेदेगुणाः यावतो विषयदर्शनमात्रा गम्यते एव
मपि समानाधिकरणेने निवर्त्तते व्यधिकरणत्वात् समासो न प्राप्नोति। किं हि वचनान्न भवति य
द्यपि तावदवचनात् समासः स्यात्। इह तु खलु कृष्णा गावः धवला गवः धवलाः समानाधिकरणाल्लब्ध
णः पुंवद्भावो न प्राप्नोति। एवं तर्हि तस्यामेवो भयं वर्त्तते। एतच्चात्र युक्तं यत्तस्यामेवो भयं वर्त्तेत इ

राम

ति। इत्यत्र हि बहुरूपेक्षं स्यान्न यदि तावदेवं विग्रहः किं पुनरेतत् ध्रुवस्यामा देवदत्तेति शास्त्रांतरस्यामेम
ध्येन रूपे संस्थानं। अथ द्वाष्टवां विग्रहः क्रियते पथ्यापथ्यौ सामान्ये। द्विरिष्टैव देवदत्तेति एवमपि
देवदत्तायां रूपमेव न रूपे संस्थानं। एवमपि गुणोऽन निर्दिष्टो भवति बहवष्टरास्तु गुणाः
गोरूपाः समस्ताः एकत्व इति। अपि निर्दिष्टमानस्यापि गुणस्य भवति लोके प्रत्ययः। जघन्यत्वे
द्रव्यत्वो देवदत्तेति बहवष्टुङ्गगुणाः यावान्सो ग्रियदर्शनना सामान्यतोऽनुपमानसमासेऽगु
णावचनस्य विशेषणाकांक्षसामान्यवचनात् प्रसिद्धिः। उपमानसमासे गुणवचनस्य विशे
षणाकांक्षसामान्यविषयस्याप्रसिद्धिः स्यान्न शास्त्रीयसमासः। समासाश्रयो द्वन्द्वशास्त्रीयाद्
नामिसंबध्यमानो विशेषवचनः संपद्यते तत्र सामान्यवचने इति समासोऽनर्थको भिन्न
वा रूपासमत्वेऽप्युभयपदसमासानन्वयकत्वाद्बहुव्रीहौ सामान्यवचनत्वे प्रसिद्धिः। नवा
एषदोषः। किं कारणं रूपासमत्वेऽप्युभयपदमध्यवाहतनमपत्रे वाद्रूपासमत्वे सामासि। शास्त्रार

मा०

वदन्नायां वानपवकाशो धनशब्दस्य न तावकश्चात्र श्यामाशब्दः प्रयुज्यते किं वा वक्तुमयं वाच
कः। श्यामत्वस्योपमेयगतस्याभावान्न द्वावेकं लाघवात् स्यात् सामान्यवचनं ग्रहणं सिद्धं सामान्यवचनेष्व
सिद्धं सामान्यवचनैरिति समासो भविष्यति। नार्थः पद्य एव सामान्यवचनैः। यो लक्षणतः सा
मान्यमाहाद्वयोरपि यः सामान्यमाह सोऽपि सामान्यवचन एव। अत्र च सामान्यवचने
रिति पृथग्योगे सर्वशब्दोऽन्येन शाब्दे नाभिसंबध्यमानो विशेषवचनैः संपद्यते। न एवं विज्ञा
यमानः शास्त्राभिसंबंधात् सामान्यवचनैरिति पृ सा॥ छ॥ उपमितं व्याघ्रादिभिः सा
मान्याप्रयोगे॥ छ॥ सामान्याप्रयोग इति किम् अर्थ इह माभूत् पुरुषोऽयं व्याघ्र इव शू
रः पुरुषोऽयं व्याघ्र इव बलवानिति। सामान्याप्रयोग इति शाकपार्थिवकुंकमान्न भवति पुरु
षोऽयं व्याघ्र इव शूरः पुरुषोऽयं व्याघ्र इव बलवानिति अत्र सामर्थ्यानेकत्व समासमर्थ्यापेक्षमम
समर्थं भवतीति एवं तर्हि सिद्धे सति यत्सामान्याप्रयोग इति ज्ञापितेनैव तज्ज्ञापयत्याचा

राम

३०५ ४

३४

यः भवति वै प्रधानस्य सापेक्षस्यापि समास इति। किमेतेन ज्ञाप्यते प्रयोजनं। राजपुरुषोऽभि-
रूपः राजपुरुषो दर्शनीयः। अत्र वृत्तिः सिद्धा भवति॥ छ॥ विशेषणं॥ छ॥ विशेषणं विशे-
ष्येणोभयविशेषणालाङ्गमयोष्ठविशेष्यलाङ्गुपसर्जनार्थसिद्धिः। विशेषणं विशेष्ययो-
रुभयविशेषणालाङ्गमयोष्ठविशेष्यलाङ्गुपसर्जनस्यार्थसिद्धिः। कृष्णतिलो इति। कृष्ण-
शब्दोऽयं तिलशब्देनाभिसंबध्यमानो विशेषणं भवन् संपद्यते तथा तिलशब्दः कृष्णशब्दे-
नाभिसंबध्यमानो विशेषणं भवन् संपद्यते तदुभयं विशेषणं भवतु भयं वा विशेष्यं वि-
शेषणं विशेष्ययोरुभयविशेषणालाङ्गमयोष्ठविशेष्यलाङ्गुपसर्जनस्यार्थसिद्धिः। न
वान्यतरस्य प्रधानभावान्न द्विशेषकत्वाद्वा परस्योपसर्जनत्वसिद्धिः। न वा एकशेषः किं
कारणं। अन्यतरस्य प्रधानभावात्। अन्यतरस्य प्रधानभावान्न द्विशेषकत्वाद्वा परस्य न द्विशे-
षकं वा परस्यान्यतरस्य प्रधानभावान्न द्विशेषकत्वादपरस्योपसर्जनसंज्ञा भविष्यति।

प्रा०

थद्दाश्चस्यतिलाः आव । बाल्येन यिवक्षितामर्थं तिकृष्णो विशेषकत्वेन तदा तिला प्रधानं कृष्णो
विशेषणं कामेतर्द्धेनेनैव हेतुना यस्मात्कृष्णाः प्राधान्येन विवक्षितामवेति तिलास्तु कृवि
शेषणत्वेन तेन कर्मधा योतिलकृष्णाइति नकर्मधारयं नत्वेषद्वंद्वः तिलाश्चकृष्णाश्च इति नखल्वपि
षष्ठीसमासः तिलानांकृष्णास्तिलकृष्णाइति । किंतर्हि द्वाविमौ प्रधानशब्दौ एकस्मिन्नर्थेप्र
गपदेवतस्थ्येतेनवदयोः प्रधानशब्दयोरेकस्मिन्नर्थे युगपदेव वर्तमानयोः किंविशेषणप्रयोज
नमस्मिन्नत्र प्रयोगादेतन्नगेनकेश्चेनमतात् । पतरत्प्रधानेन द्विशेषकंवा परमिति । नत्वत्वेना
वातूमे देहः किं प्रधानं किं विशेषणमिति मवापिकसंदेहः प्रयोभौ गुणशब्दौ न यथा खंड
कुब्जः कुंजः खंज इति । यत्र येन्यतरत् द्रव्यतन्यतरो गुणः तत्र यत्तद्रव्यंतत्प्रधानं न यथा पुष्कि
मालभेत कृष्णमालभेत नपि हं पिंडी मालभ्य कुतो भवति अवद्रव्यतन्द्रुणाद्वैयमा कांक्षतिक
—यंतहि सोरे प्रधानशब्दावेकस्मिन्नर्थे युगवदस्थ्येतेनवृद्धः । किं पेक्षिनैनयोरावश्यकम्

राम

२०१

मादेशाः नत्वेकत्वसंज्ञायां भवन्ति ॥ पूर्वापरप्रकरणम् ॥ अथ किमर्थमुत्तरत्रैवमाद्यनुक्रमणं क्रिय-
ते न विशेषणविशेष्येण बहुलमित्येव सिद्धत्वात् बहुलवचनस्याकृतिगणत्वादुत्तरत्रानुक्रमणार्थं। कृ-
तं बहुलवचनमित्युत्तरत्रानुक्रमणं क्रियते। यद्यकृतं स्यात् तदनेन कृतत्वात्तेनैतन्नु। एवं तर्हि
नञ् मोऽकृस्यामिति कृताल्वकारकं वसाधकं वनिर्वर्त्तकं व यद्वानेन कृतं स्युः कृतेनेतर किमर्थमि-
त्येवमाद्यनुक्रमणं क्रियते। उदाहरणप्रपञ्चार्थम्। एतेन खल्वपि विधयः सुपरिगृहीता भवन्ति।
येषु बहुलग्रहणं पृणावश्चाकेवलेलक्षणोकेवलेऽप्यंवोवानेतञ्चाकारकं भवति। अवशेषं रव-
त्वच्छस्यामिति दंवकंच्य बहुलमन्यतरस्याम्। तमयथ्वा। एके प्रामितिः। सर्ववेदपारिषदं हि
इदं शास्त्रं तत्र नैकः पन्थाः शक्य आस्थातुम् ॥ छ ॥ श्राणादयः ॥ छ ॥ श्राणादयः शब्दा नेकृताद्वि-
रात्कृतिगणः। श्राणादिषु अर्थवचनम्। श्रेण्यादिषु अर्थग्रहणे लौकिकोऽत्रे अश्रेण्यः श्रेण-
यः कृताः श्रेणिकृताः यदा हि श्रेणय एव किंचित् क्रियन्ते न तदा समासः स्यादिति अन्यत्राप्यर्थग्रह

भा०

ग्रेषु द्वंद्वस्य प्रतिषेधं शास्ति तदिह न तथा। किं कारणं। अन्यत्र सर्वनाम्नां कार्ये परे ऽस्मिन् कार्ये इह
पुनः सर्वेऽप्यर्थकार्ये परे ऽनेन कार्यं॥ ६॥ क्तेन नञ्॥ ७॥ नञ्विशिष्टेन समानप्रकृतिना सह ए-
मू। नञ्विशिष्टेन समानप्रकृतिना सह णोकर्म व्यं इह मा भूत् गतसिद्धं वा ... भुक्ते वेति। अनसितिवश-
नि घेयो वक्तव्यः। इह मा भूत् कृतं व्यसकृतामिति। तुष्टिदुःखिकेन वा। तुष्टिदुःखिके च समासो
वक्तव्यः। इहापि यथा स्याद् अशितानशितेन जीवति क्लिष्टा[illegible]। क्लिशितानैकिं शुभ्यन्ते
समानप्रकृतिना सह णोकर्तव्यमिति प्रदानं। ज्ञिविशिष्टेन तुल्यार्थेन वा त्र नञ्कृत एव विशे-
षः। किं तर्हि प्रकृतिकृतोऽपि। अर्थे विशिष्टे शाब्देऽस्य वा अवधारणे वर्तनेन षष्ठ्या देवदत्तस्य
त्वं दत्ता वा ह्या वमि रूपो दर्शनायोपपन्नं वैनौ देवदत्तस्य पठन्दत्तात्स्याध्यायेन विशिष्टः स्वा-
ध्याये नैव तिगम्यते अन्ये गुणाः समासा भवेति। अस्माधिके वर्तनेन षष्ठ्या देवदत्तस्य पठन्द-
त्ता वा आवमि रूपो दर्शनायोपपन्नं वैनौ देवदत्तस्य पठन्दत्तान्स्याध्यायेन विशिष्टः स्वाध्या

३०१

नेत्रिप

राम

३०७

39

येनाधिकः अन्ये गुणा अविवक्षिता भवन्ति। तद्यथा तावदूर्ध्वमाररोहिणो विशिष्टस्थाद्द तद्दानैवार्थः स
मानप्रकृतिग्रहणान्न नेह भविष्यति सिद्धं वा अनुक्तं वैति नाध्यनसि लिङ्गनिषेधेन नेह भविष्यति।
कर्तव्यमकृतमिति तु द्विडधिकेनापि तु न दास समासो भवन्त्याशंसा न यत्राधिको विशिष्टत्वात् तदास
मानप्रकृतिग्रहणं कर्तव्यमिह माभूत् तु सिद्धं वा अनुक्तं वेति अनन्तिति वचनं जिबेधो वक्तव्यः इह
माभूत् कर्तव्यमकृतमिति तु द्विडधिकेनापि तदास समासः सिद्धो भवति तत्राधिको विशिष्टत्वा
त् मत्वा समानप्रकृतिग्रहणं बाधते। अवधारणं नञा वेत् तु द्विडि शिष्टेन नञ् प्रकृत्यो। अथवे
दृष्टिकविवक्षा कार्यं तुल्यप्रकृतिग्रहणं कर्तव्यं। अवधारणं नञा वेत् तु द्विड्ढ शिष्टेन नञ् प्रक
ृतेन। अथवेष्टिकविवक्षा कार्यं तुल्यप्रकृतिकेनेति। कृताकृतादीनां वोपसंख्यानं। कृता
पकृतादीनां वोपसंख्यानं कर्तव्यं। कृतापकृतं भुक्तविभुक्तं पीतविपीतं। सिद्धं तु क्तेन विसमा
नावनञ्। सिद्धमेतत् कथं क्ताने न क्रियाविसमासो नञ् भवति क्तान्ते समस्यन्त इति वक्तव्यं।।

प३

भा०

गणादीनां चोपसंख्यानं । गतनृत्या गणेया जाजुष्यानेऽष्टुराष्टुटिका । कथ्याकथिका । कलाफलिका । म-
नोन्मानिका ॥छ॥ युवा खलतिपलित ॥छ॥ अस्तु कोऽयं निर्देशः । समानाधिकरणेनेति वा-
र्तिते कः प्रसंगो व्यधिकरणानां समासः स्यात् एवं तर्हि ज्ञापयत्यनया वार्थः । यथाजातीयकस्तुत्त-
रपदं तथाजातीयकेन पूर्वपदेन समासो भवतीति किमेतस्य ज्ञापने प्रयोजने प्रातिपदिक-
ग्रहणे लिंगविशिष्टस्यापि ग्रहणं भवतीत्येषा परिभाषा न कर्त्तव्या भवति ॥छ॥ वर्णो वर्णेन
॥छ॥ इह विबाधिते वर्णो वर्णेन तुल्यार्थाः समासो वा स्यात् कृष्णेन सारंगः कृष्णसारंग इति । समाना-
धिकरणेन वा कृष्णः सारंगः कृष्णसारंग इति । कथमत्र विशेषः वर्णो वर्णेन तुल्यार्थासमास एतत्प्रतिषे-
धे वर्णग्रहणं । वर्णो वर्णेन तुल्यार्थासमासे एतत्प्रतिषेधे वर्णग्रहणं कर्त्तव्यं । तुल्यार्थापूर्वपदे कृति-
स्वरं भवति । अनेनैव सतीति यत्कर्त्तव्यं । अथ द्वितीये न वर्णग्रहणेनैतद्विशेषणेनार्थः । बाढमर्थः । राम
पूर्ववत् सतीत एतद्गोऽस्ति । न तु वा पुनरस्ति आह इतः एतः कृष्णतोलोहितेतद्इति नार्थ एवमर्थेन वर्ण-

३०४

२०८

ॐ

ग्रहणेन यदि तावदयं कर्म्मणि क्तः तृतीया कर्म्मणि नित्यमनेन स्वरेण भवितव्यं अथापि कर्त्तरि परस्मा
न्नेनस्वरेण भवितव्यं अथ समानाधिकरणः । समानाधिकरणो द्विवर्णग्रहणं समानाधिकर
णो द्विवर्णग्रहणं कर्त्तव्यं वर्णो वर्णेष्वनेन इति वक्तव्यं । एकं वर्णग्रहणं कर्त्तव्यं । इह मा भूत् वपर
मश्च स्थः परम स्थः । द्वितीयं वर्णग्रहणं कर्त्तव्यं । इह मा भूत् दकल्लतिलाइमि । एकं वर्णग्रह
णमनर्थकं । अवर्णस्य वा वर्णे वर्णस्य वा वर्णे । अन्यतरस्य कस्मान्न भवति । लक्षणप्रतिपदोक्तयोः
प्रतिपदोक्तस्यैवेति । एवं तर्हि तान्येतानि त्रीणि वर्णग्रहणानि भवन्ति । समासविधौ द्वे स्वरविधौ
चैकं सयस्मादिति तृतीयासमासस्यापि तान्येव चत्वारि वर्णग्रहणानि भवन्ति समासविधौ द्वे
स्वरविधौ चैकं सामान्येन समन्ततो यासमासो भविष्यतीति तृतीयान्तकृतार्थेन गुणवचनेने-
ति । अवर्णस्य वर्णेन प्रतिपदं समासो वक्तव्यः । पुनरनेन न सिध्यति तदर्थं कृत्यतेनेन सिध्यति । स्तु
कमधुहरिन वधुरिति । तथा समन्ततान्येतानि त्रीणि वर्णग्रहणानि भवन्ति समासविधौ द्वे स्व

मा०

रथिचौचैकं। अथेदानीं समानाधिकरणः सामान्येन सिद्धः सामानाधिकरण्यं सिद्धकार्यविशेषणं विशेष्येण
बहुलमिति। एवमपि इदं वक्तव्यं इह लोके कर्तव्ये स्वरयित्वा वैवश्चति परोक्षस्याभावात्स्मात्समानाधिक
रणात् इत्येष पक्षो मार्योनू। समानाधिकरणाधिकारे प्रधानोपसर्ज्जनानां परं परं विप्रतिषेधेन।
समानाधिकरणाधिकारे प्रधानोपसर्ज्जनानां परं परं भवं भवति विप्रतिषेधेन। प्रधानानां प्र
धानं। उपसर्ज्जनानामनुपसर्ज्जनं। प्रधानानां तावत्प्रधानं। वृन्दारकनागकुञ्जरैः पूज्यमानमित्य
स्यावकाशः गोवृन्दारकः। अश्ववृन्दारकः। कोसलयुवतीनामवकाशः इभ्ययुवतिः आढ्ययुवतिः इ
होभ्यः श्रोत्रियोतिनामयुवतिः वृन्दारकयुवतिः प्रधानानां परं प्रधानं भवति विप्रतिषेधेन। उपस
र्ज्जनानां परमनुपसर्ज्जने सन्महत्परमोत्तमान्यो। छत्ता इत्यस्यावकाशः सद्वैद्यः सद्वृक्षः। कतरत्
स्यारयाभ्रलाभ्येतेन स्यावकाशः तुल्यश्वेतः तुल्यमहान् इहोभयं प्राप्नोति तुल्यमहान् तुल्य
महान् उपसर्ज्जनानां परमनुपसर्ज्जने भवति विप्रतिषेधेन। समानाधिकरणसमासात् बहु

राम

२०२

३५

309

व्रीहिः। समानाधिकरणो समासाद्बहुव्रीहिर्भवति विप्रतिषेधेन। समानाधिकरणो समासस्यावकाशः वी
रः पुरुषो वा रपुरुषः। बहुव्रीहेरवकाशः कंठेकालः। उरोमणिशाखेति वीरपुरुषको ग्रामः। बहुव्रीहिर्भ
वतीति विप्रतिषेधेन। कथं विकर्मधारयः सर्वधनाद्यर्थः। कदाचित्कर्मधारयो भवति बहुव्रीहेः। किं प्रयोज
नं सर्वधनाद्यर्थः। सर्वधनी सर्ववीजी सर्वकेशी नटः। गौरखरवदरण्यं कृष्णसर्पवान्वल्मीकः। लोहित
शालिमान्ग्रामः। किं प्रयोजनं। कर्मधारयप्रकृतिर्मत्वर्थीयो यथा स्यात्। किं च का
रणं न स्याद्बहुव्रीहिणोक्तत्वान्मत्वर्थस्य प्रत्युक्तत्वं हेतुः कर्मधारयेण प्रत्युक्तत्वान्न शाखेति न स्व
त्यपि मत्वाश्रयो मत्वर्थीयः किं न त्वेवंर्थाश्रयः मत्वर्थे च बहुव्रीहिणोक्तत्वा न भवति। एवं कर्मधारयेण
प्रत्युक्तत्वान्न भविष्यति। एवं तर्हि। इष्यते सर्वाणि धनानि सर्वधनानि सर्वधनान्यस्य सन्तीति सर्वधनीति।
नैवं शक्यं। नित्यमेवं सति कर्मधारयः स्यात्। तत्र यदुक्तं कदाचित्कर्मधारयप्रकृतिस्तत्र प्रत्युक्तं। एवं तर्हि
वतिवै किंचिदाचार्याः कर्मधारयं बहुव्रीहिं कृत्वा पठन्ति कार्याः शाखारोह इति नन्दादिरं पठितं समानाधिकर

भा०

॥समासा बहुव्रीहिः कर्त्तव्यः कदाचित्कर्मधारयः सर्वधनाद्यर्थं इति। यदुक्तं तेन समानाधिकरणसमा-
सो बहुव्रीहिर्भवतीति विग्रहविशेषेणेति। नैष युक्तो विग्रहविशेषः। अन्तरङ्गः कर्मधारयः कृतोऽन्तरङ्गत्वा-
त् स्वपदार्थे कर्मधारयः अन्यपदार्थे बहुव्रीहिः। अस्तु विभाषा कर्मधारयः प्रधानः कर्मधारयः। तदा
बहुव्रीहिर्भविष्यति। एवमपि पर्यायेण कदाचित्कर्मधारयो भवति कर्मधारयप्रकृतिभिर्मत्वर्थीयैरभि-
धाने प्राप्ते इति सर्वप्राप्येव समर्थोपलः कर्मधारयप्रकृतिभिर्मत्वर्थीयैरभिधानं मा भूदिति एवं तर्हि
नेदं नञ्प्रयोगस्योदाहरणं विग्रहविशेषे पूरणमिति। किं तर्हि द्विष्ठिरयं पठितः समानाधिकरणसमासा-
त् बहुव्रीहिरिष्टः। कदाचित्कर्मधारयः सर्वधनाद्यर्थं इति। यदोष्टिः पठिता नार्थोऽनेन। इह हि सर्वे मन्द-
व्याः अल्पेनाल्पेन महतो महतोऽर्थानाकाङ्क्षन्ति एकेन माषेण शतसहस्रं एकेन कुद्दालप्रहारेण खारीम-
हस्तं तत्र कर्मधारयप्रकृतिभिर्मत्वर्थीयैरभिधानमस्तु बहुव्रीहिर्मा भूदिति बहुव्रीहिणा भविष्यति लघु-
त्वात्। कथं सर्वधनी सर्वबीजी सर्वकेशी नट इति इनिप्रकरणे सर्वादेरिनिं वक्ष्यामि तत्रावर्यं वक्तव्यं

राम

२१०

310

40

ठनो वाध्यनार्थी कथं गोरखरवदरण्यं गौरमृगावदरण्यं कृष्णसर्पवान् वल्मीकः लोहितशालिमान् ग्रामः
अल्पत्वविशेषः ज्ञाप्याज्ञाप्तिसंबंधः क्रियते कृष्णसर्पो नाम सर्पजातिः सा प्राप्ति तु लोकेऽस्ति पृथक्
नरो ज्ञातिनद्व नामि संबंधः क्रियते कृष्णसर्पो विल्मीकः इत्येव न द्रामवान् एवं पूर्वपदानि शायस्रातिशायि
काद्ध बहुव्रीहिः सूक्ष्मवस्त्रतराय थः एवं पदानि शायस्रातिशायि काद्ध बहुव्रीहिर्भवति विप्रतिषेधेन दि
प्रयोजनं सूक्ष्मवस्त्रतरायथः आतिशायिकस्यावकाशः पटुतरः पटुतमः बहुव्रीहेरवकाशः चि
त्रगुः शबलगुः इहोभयप्राप्तौ सूक्ष्मवस्त्रतरः नीरसगङ्गतरः बहुव्रीहिर्भवति विप्रतिषेधेन
नैषयुक्तो विप्रतिषेधः विप्रतिषेधे परमित्युच्यते एवं स्थूलबहुव्रीहिः परआतिशायिकः इष्टवा
नोपरःशब्दः विप्रतिषेधे परं यदिष्टं तद्भवति एवमथस्तुकः सोनरंग आतिशायिकः कोऽसौ रंग
नाड्याप्यातिपदिकाद्रातिस्रौ शायिकः सुबन्तानां बहुव्रीहिः आतिशायिकोऽपि नान्तरङ्गः कथं
समर्थानां हि तद्धितवृत्तिघने सामर्थ्यं वहै सुवैतेनाएवमथं नरंगः कथं स्वपदार्थ आतिशायिकः

भा०

अन्यपदार्थे बहुव्रीहिः एवमपि नाञ्जरंगः कथं स्पर्द्धयामानिशायिको भवति नवांजरेणाश्लिषे योगे नस्प
र्द्धा भवति । नैव वात्रानिशायिकथ्याप्नोति । किं कारणम् असामर्थ्यात् ननु कथम् असामर्थ्यं । सापेक्षम् असमर्थं भ
वतीति । यावता अवस्थाशितिन इतनम पेक्षं नेनद्वंते वा पेक्ष्यवस्थाशांवेत्रे युगपत्स्पर्द्धा भवति न तु वाय
मानिशायिक एवमामकः सन्न्यान्व्यपेक्षा यां विधायते सन्न्यमेव मात्मको यांव नांजरेणाव्यपेक्षा
मा ति शायिकस्य स्पृष्टत्रिलस्यो सन्न्यान्न विनव्यंतो वनांजरेणाव्यपेक्षा यामानिशायिकस्य स्पृष्ट
त्रेः या हि व्रतियोगिने श्लिव्यपेक्षा वा हि तद्वंते शजिनन स्यां भवितव्यं बहुव्रीहिः अपि तहिं न श्नोति
किं कारणम् असामर्थ्यादेव कथम् असामर्थ्यं सापेक्षम् असमर्थं भवतीति यावता अवस्थाशिवस्त्रां मरणाप
पेक्षं नेनद्वाभावाभिसंबंधः एवं तर्हि नेदं तस्य योगस्योदाहरणं विप्रजिष्टपेपरमिति किं तर्हि दृष्टि
रियं पनिष्टिताद्भिरागदाजिरायज्ञानिशायिका बहुव्रीहिरिष्टा स्याद्वस्त्रान्तरा पृष्ठिरिजिप्रदाष्टिरियंप
हिताना र्थोऽनेन कथं ये पाप्नुक्तिरका । वस्त्रां मरणां वस्त्रीन्तरे युगपत्स्पर्द्धानद्वाभावाभिसंबंधा

३॥ ३७७

राम

इतिपरस्परं नरेणावस्थानां वस्त्रैर्युगपत्स्पर्द्धितत्ताभासि संबंधः। किं यत्र निष्प्रतिद्वंद्वं सराजा बहुव्री
हिः। बहुव्रीहौ राजिराधिकः। नतहीरानो ऽभिहितं भवति सूक्ष्मनरत्ववस्तु न भवति यदां न रेणाजद्वंद्वे
वस्त्राणां वस्त्रैर्युगपत्स्पर्द्धो निष्प्रतिद्वंद्वस राजेति राधिकः। कथं पुनरन्यस्य प्रकर्षेणान्यस्य
प्रकर्षः स्यात् नैवान्यस्य प्रकर्षेणान्यस्य प्रकर्षेण विजयः। यथैवार्थे द्वंद्वे सुयत्नेन वस्त्रा
णि मेसुरितिरवंगुणोच्छ्रितमनेन सूक्ष्मनराणिमेसुरितिनात्राविराधिकः। शाखाजित्किं
कारणं गुणावयवानां हि स्तुवानेन वस्त्रैः समस्तो गुणावयवनः समासो ऽपि गुणावयवनः। कथं
अन्न हस्त्यादिवद्भिरिति। अथ यद्वा हस्त्यार्थायां तु देशपवल हस्त्यार्थायां वनदेशा। भवति न
तु णोमविज्ञानमपि न यथा वस्तुक्कवासस्समानयद् लोहितो ऽक्षोघाः। एवं रसो नितन्तु णश्रानी
यते न हु णाच्छ्रद्धयं रौनित न रूपरशातिशायेत्र्या नित्यायिको बहुव्रीहेः। बहूनां घनरागधर्षः। तन्रप
दानिशायेत्र्या नित्यायिको बहुव्रीहेर्भवति विशतिविधेनोकिं प्रयोजनं बद्धा घनराघर्षः॥

भा० बह्वाढ्यो नरः बहुसुकुमारी नरः कः पुनरत्र विशेषः बहुव्रीहौ वातिशायिकः स्यान्नात्रातिशायिको
नेन वा बहुव्रीहिः स्वरकृतो विशेषः यद्यत्रातिशायिका न बहुव्रीहिः स्यात् बह्वाढ्यो नरः एवं
स्वरः प्रसज्येत बह्वाढ्यनर इति चेष्यते बह्वाढ्यकनर इति च ग्रामो ग्रामे ति बह्वाढ्यतर इत्यकदृते नेष्यते
समानाधिकरणाधिकारे शाकपार्थिवादीनामुपसंख्यानमुत्तरपदलोपश्च ॥ समानाधिकर
णाधिकारे शाकपार्थिवादीनामुपसंख्यानं कर्त्तव्यमुत्तरपदलोपश्च वक्तव्यः ॥ शाकभोजी
पार्थिवः शाकपार्थिवः कुतपवासाः सौश्रुतः कुतपसौश्रुतः अजातौल्वलिरजातौ
ल्वलिः यष्टिप्रधानो मौद्गल्यो यष्टिमौद्गल्यः ॥ ६९ ॥ चतुष्पादः ॥ ७० ॥ चतुष्पाज्जातिरिति व
क्तव्यं इह मा भूत् कालाक्षी गर्भिणी स्वस्तिमती गर्भिणी ॥ ७१ ॥ मयूर ॥ ७१ ॥ किमर्थश्चकारः ए
वकारार्थः मयूरव्यंसकादय एव इह मा भूत् परमं मयूरव्यंसक इति ॥ ७२ ॥ इति श्रीम
द्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये द्वितीयस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकं

राम

२१२

४२

कं०पा२स्थ्य प्रथमः॥ छ॥ ॥अर्द्धं नपुंसकम्॥ ॥छ॥ ॥इह कस्मान्न भवति ग्रामार्द्धो नगरार्द्ध इति
अर्द्धशब्दस्येह नपुंसकलिंगस्य ग्रहणं पुल्लिंगश्चार्द्धशब्दः क्व तु नपुंसकलिंगः क्व तु
नः पुल्लिंगः। समप्रविभागे नपुंसकलिंगः। अवयववाचि पुल्लिंगः। इह कस्मान्न भवति अर्द्धपि
प्पली नास्ति। न वा भवत्यर्द्धपिप्पल्य इति। भवति यदा खण्डसमुदायः अर्द्धपिप्पली वार्द्धपिप्प
ली वार्द्धपिप्पली वार्द्धपिप्पल्य इति यदा त्वेन द्वावंशावर्थवन्ति अर्द्धपिप्पली नास्ति तिनदा न नैवि
नष्टेति तदा कस्मान्न भवति। एकाधिकरणे इति वचनात् न तु हीदानीमिदं भवति अर्द्धराशिरिति भ
वत्येकमेवेदमधिकरणं योऽसौ राशिर्नाम॥ छ॥ द्वितीयतृतीय॥ छ॥ अन्यतरस्यां ग्रहणं कि
मर्थम् अन्यतरस्यां समासो यथा स्यात्। समासेन मुक्ते वाक्यमपि यथा स्यात्। द्वितीयं भिक्षा
या इति नैतदस्ति प्रयोजनं एकं नाम महाविभाषानया वाक्यमपि भविष्यति इदं न हि प्रयोजनं
एकदेशिसमासेन यत् मुक्ते षष्ठीसमासोऽपि यथा स्यात् भिक्षाद्वितीयमिति एतदपि नास्ति इ

८।०

योजनं अयमपि विभाषा बष्टा समासोऽपि नास्तु मौ वचनाद्विकल्पितः अजन्तर पठति द्वितीयादीनां वि
भाषा प्रकरणे विभाषावचनं ज्ञापकं अवयवविधाने समासस्य विभाषाभावस्य द्वितीयादीनां
विभाषा प्रकरणे विभाषावचनं क्रियते ज्ञापनार्थं किं ज्ञाप्यते एतज्ज्ञापयत्यन्यो वाधिः अवयववि
धौ सामान्यविधिर्नित्यं न भवतीति किमेतस्य ज्ञापने प्रयोजनं छिन्नत्रिभिन्नत्रीतिश्र मिकृते शास्त्र
भवतीति नैतदस्ति प्रयोजनमूरशावादेशाः स्यस्त्राः स्यः करिष्यते। नत्ताहि शपो ग्रहणं कर्तव्य
न कर्तव्ये प्रकृतमनुवर्तते क प्रकृतं कर्तरि शबिति दैवप्रथमानिर्दिष्टं षष्ठी निर्दिष्टेन वे हार्थः
तु धाहि स्पष्टस्येषां पंचमी शबिति प्रथमायाः षष्ठी प्रकल्पयिष्यति तस्मादित्युत्तरस्येति प्रत्यय
विधिरयं न च प्रत्ययविधौ पंचम्यः प्रकल्पिकाभवंति नायं प्रत्ययविधिः विहितः प्रत्ययः प्रकृ
तश्चानुवर्तते एवं तर्हि ज्ञापयत्याचार्यः पञ्चोनामिपवादे विभाषा नञ्चापवादे न मुक्ते भन्त्ससान
भवेत्रीति किमेतस्य ज्ञापने प्रयोजनं दिवःसूर्यपदे ङीपू श्रा स्तु विप्राणस्तुवो गत्य स्तुवीप्रत्य

राम

३१३

३१२

४३

श्रुत्वाऽ। पाम्सुके ऽ। धुस्तु भवति नेत्र दालि प्रयोजनं वस्मान्येनगुहादिकर्मपदात्त्वादानुदात्त
त्वेऽर्ते द्विधाने घेनम्त्रापिऽ। षिष्टयाऽ। द्रूपसंगडति। इदं नहि प्रयोजनं अध्यक्षपिच्छली अर्धे
कोशानकाएकदेशिसमासेन मुमके षष्ठीसमासो न भवतीति। तन्मात्रं गंगालोहितं गा
ं। अव्ययीभावेन मुके बहुव्रीहिर्न भवति। दासिः आर्षिः। इमामुकेन न भवति। यद्येतान्त
र्णाप्यतेऽपगोरपत्यमौपगवा।। तद्धितेन मुके उपगवपत्यमिति नेन सिद्ध्यति। अस्यत्र विशेष॥
इत्यन्न विभाषेदे वयद्द्धिशो विट्टशिमापिसुश्निकांडेदिद्धि ण्योन्यस्तरस्याः समर्थानां प्रथम
माद्वेतिनत्रैकयावृत्ति विभाषा अपरयारु त्रिविषये विभाषा पवाद्दः। क्रियमाणेपि वे अन्य
तरस्यां ग्रहणं षष्ठीसमासो न प्राप्नोति किं कारणं ग्रहणेनेति जिग्रजिसे क्षात नेतन्ग्रहणं तन्न
नाऽएतस्य वपत्यपन द्रेपिग्रहणं न मे व ग्रहणं नामार्थिः न माह नोपग्राद्दः। अतः ग्रहणं यो
सोऽप्रग्रहणं नान्वार्थमागेऽग्रहणेपि ग्रहणं मे वएवेन हीन्यतरस्यां ग्रहणं समर्थानां षष्ठी।

मा० समासो भविष्यति ॥ आशंका ॥ किमर्थश्चकारः अनुकर्षणार्थः । अन्यतरस्यां ग्रहणमित्येतदनु
कृष्यते ॥ किं प्रयोजनं अन्यतरस्यां समासो यथा स्यात् ॥ समासेन मुक्ते वाक्यमपि यथा स्या
त् ॥ जीविकाशब्दस्य इत्येतदस्ति प्रयोजनं ॥ ग्रहणं महाविभाषा तया वाक्यमपि भविष्य
ति ॥ इदं तर्हि प्रयोजनं नित्यः समासो पि यथा स्यात् । जीविकाशब्दस्य इत्येतदस्ति प्रयो
जनं ॥ अथ समस्तु यत् तर्हि नीया समासो पि तद् अन्यं वचनाद्भविष्यति । एवं तर्हि नाथ मनुक
र्षणार्थश्चकारः ॥ किं तर्हि लक्षणेन विधीयते श्राद्धा यत्रेष्टिनीयाने न सह समस्येते । त्वं वम
विधानि श्राद्धापत्रयोरिति श्राद्धजीविकाशब्दजीविकामापन्नजीविका ॥ कालाः परि ॥
किं प्रयोजनं यत् समासनञ्नत्रपरपदार्थप्रधानः यत्पुरुष उत्तरपदार्थप्रधानः समस्तपदाभिधाने नान्यैः तत्र स्यं
दार्थप्रधाने भवति तत्र ॥ अन्येषु बोत्तरपदार्थप्रधाने पूर्वे काले मावंतत्वर्त्तिनी विभक्तिरस्त
स्या समासे पि श्राद्धे तत्र भवति । तद्यथा राजपुरुषो राजपुरुषमित्यादि पुनर्भाको बहुत्री स

मासेऽप्यथ माके नैतदेवं भवति । योऽसौ मासजातयोरभिसंबन्धः स समासेन निर्वर्त्तते । अभिहितः सो
थें निर्वृत्तेः । प्रातिपदिकाच्छः सम्प्रत्ययः प्रातिपदिकार्थे प्रथमेति प्रथमा भविष्यति । ननु हि
दानीमिदं भवति मासजातस्येति । भवति वाक्ये समर्थसमिसमसीक्ष्यं छो । कालस्य येन समास
स्तस्यापरिमाणित्वादनिर्देशः । कालस्य येन समासः सोऽपरिमाणि तस्यापरिमाणित्वादनि
र्देशः । आगमको निर्देशो निर्देशः । न हि जातस्य मासः परिमाणं । कस्य तर्हि त्रिंशद्रात्रस्य तद्यथा
द्रोणो बदराणां इमस्येति न देवदत्तस्य द्रोणः परिमाणं कस्य तर्हि बदराणां ॥ सिद्धं तु कालप
रिमाणं यस्य स कालस्तेन ॥ सिद्धमेतत्कथं कालपरिमाणं यस्य स कालस्तेन समस्यत इति वक्त
व्यं ॥ सिध्यति । सूत्रं तर्हि भिद्यते यथान्यासमेवास्तु ॥ ननु चोक्तं कालस्य येन समासस्तस्यापरिमा
णित्वादनिर्देश इति ॥ कं पुनर्भवानिह कालं मत्वाह । कालस्य येन समासस्तस्यापरिमाणित्वादनि
र्देश इति येन मूर्तीनामुपचयापचयाश्च लक्ष्यन्ते तं कालमित्याहुः ॥ तस्यैव हि कयाचित्क्रिय

भा०

यासु तस्मा हीरितिवभवति राविरितिवव घ्नाक्रियया ञ्जादित्यगात्पातये वा समृद्रा ष्टन्न या मास
इति वा भवति संवत्सर इति च भवति यथैवं भवति ज्ञानस्मा मासः परिमाणं। एकवचनद्विगो-
श्चोपसंख्यानं॥ एकवचनांतत्वमिति वक्तव्यं॥ इह मा भूत्। पंचमासौ ज्ञातस्य पंच मासा ज्ञातस्येति द्वि-
गोश्चेति वक्तव्यमिहापि यथा स्यात्। द्विमासजातः॥ त्रिमासजातः॥ तत्कं वा किमुक्तं। एकव-
वचनेनाबहुत्वमनभिधानादिति द्विगोः। किमुक्तं॥ उत्तरपदेन परिमाणिना द्विगोः समासव-
चनमिति कालाः परिमाणिना॥ किं प्रधानोऽयं समासः उत्तरपदार्थप्रधानः यद्युत्तरपदार्थप्रधानः
श्राद्धस्यागामानयेत्युक्ते श्राद्धस्यागामानयन्नं शेत्ति। अन्यपदार्थप्राधान्ये सत्यहि निविष्ठ-
मिति पूर्वपदार्थप्रधानत्वाद्धि भविष्यति यदि पूर्वपदार्थप्राधान्यात् अव्ययसंज्ञा प्राप्नोति। अव्य-
यं चेत् पूर्वपदमिति नैष दोषः पाठेनाव्ययसंज्ञा क्रियते न च नञ्समासस्तत्र पठ्यते यद्य-
पि नञ्समासो न पठ्यते। नञ् तु पठ्यते पाठेनाव्ययसंज्ञायां समासस्यापि प्राप्नोति तद्वचनात् निम

दोस

315

३७५

७५

यंतिषष्ठेहार्थेऽभिधीयते न तस्माल्लिंगसंख्यायोगोऽस्ति नेस्वाभाविकमलिंगता असंख्यता वा।
किं तर्हि स्वाभाविकमेतत्॥ न यथा समानमीहमानानां चाधीयमानानां च केचिदर्थैर्युज्यन्तेऽन्ये
परे न न वेदानीं कश्चिदर्थैर्वा निनिष्फला सर्वैरर्थैर्वाद्भिः शाकं। भवितुं कश्चिद्धानर्थक इति सर्वैरेन
र्थकैः। अत्र किमस्माभिः शक्यं कर्तुं यच्च अशक्यं सामान्याल्लिंगसंख्यायोगो नास्ति समासेव
भवति स्वाभाविकमेतत्॥ अथवा आश्रयतो लिंगवचनानि भविष्यन्ति॥ इदं तावदयं प्रष्टव्यः॥
अथेह राजपुरुषमानयेत्युक्ते पुरुषमात्रस्यानयनं कस्मान्न भवति अस्त्यत्र विशेषः॥ गुण
वचनानां हि शब्दानामाश्रयतो लिंगवचनानि भवंति। तद्यथा शुक्लं वस्त्रं शुक्ला शाटी शुक्लः
कंबलः शुक्लौ कंबलौ शुक्लाः कंबला इति यदसौ द्रव्यं श्रितो भवति गुणस्तस्य यल्लिंगवचनं
तद्गुणस्यापि भवति एवमिहापि यदसौ द्रव्यं श्रितो भवति समासस्तस्य यल्लिंगवचनं तत्स
मासस्यापि भविष्यति। अथवा पुनरस्तूत्तरपदार्थप्रधानः ननु चोक्तमव्ययीभावे समानाधिकरणे

भा०

ब्राह्मणेनामात्रस्यानयनं प्राप्नोतीति नैष दोषः । राजा विशेषकः प्रयुज्यते तेन विशिष्टस्या-
नयनं भवति । इहापि तर्हि नञ् विशेषकः प्रयुज्यते तेन नञ्विशिष्टस्यानयनं भवति । इहापि
तर्हि नञ् विशेषकः प्रयुज्यते तेन नञ्विशिष्टस्यानयनं भविष्यति कः पुनरसौ निवृत्तप-
दार्थकः यदा पुनरस्य पदार्थो निवर्त्तते किं स्वाभाविकी निवृत्तिराहोस्वित् वाचनिकी यावता य-
दि स्वाभाविकी किं नञ् प्रयुज्यमानः करोति अथ वाचनिकी तदर्थं नञ् प्रयुज्यमानः प-
दार्थं निवर्त्तयतीति । एवं तर्हि स्वाभाविकी निवृत्तिः ॥ ननु चोक्तं ॥ किं नञ् प्रयुज्यमानः करो-
तीति नञ् प्रयुज्यमानः पदार्थं निवर्त्तयति कथं बालप्रशिक्षालवनवत् यथा कोलश्चाहमम-
नुं कीलं निर्हंसि यद्येनं ओमाहात्मं स्यान्ननात्तु चिद्द्राज्ञानो हल्मश्रुधि प्रयुक्तः । नेन्मेवराज्ञा-
नो प्रयुक्तः ॥ एवं तर्हि स्वाभाविकी निवृत्तिः ननु चोक्तं किं नञ् प्रयुज्यमानः करोतीति नञ् निमि-
त्तानुपलब्धिः । न यथा समन्धकारे द्रव्याणां समवस्थितानां प्रदीपनिमित्तं दर्शनं भवति तस्मै

राम

३१८

श्रीयो निवर्त्तको भवति । यदि पुनरयं निवृत्तपदार्थको ब्राह्मणशब्दः किमर्थं प्रयुज्यते । एवं यथा वि
ज्ञायेत अस्य पदार्थो निवर्त्तत इति नैतदस्ति संदेहः स्यात् । कस्य पदार्थो निवर्त्तत इति तत्रासंदेहा
र्थं ब्राह्मणशब्दः प्रयुज्यते एवं तर्हि । अथवा सर्व एते शब्दा गुणसमुदायेषु वर्त्तन्ते । ब्राह्मणः क्ष
त्रियो वैश्यः शूद्र इति । तपः श्रुतं च योनिश्चेत्येतद्ब्राह्मणकारकं । तपःश्रुताभ्यां यो हीनो जाति
ब्राह्मण एव सः । तथा गौरः शुच्याचारः पिंगलः कपिलकेश इत्येतानप्यभ्यंतरान्ब्राह्मण्ये गुणा
न्कुर्वन्ति समुदायेषु वृत्ताः शब्दाः अवयवेष्वपि वर्त्तन्ते यथा । पूर्वे पंचालाः उत्तरे पंचालाः ॥ तै
लं भुक्तं घृतं भुक्तं ॥ शुक्लो नीलः कपिलः कृष्ण इत्येवमयं समुदाये ब्राह्मणशब्दः प्रवृत्तोऽवयवेष्व
पि वर्त्तते जातिहीने गुणहीने तावत् अब्राह्मणोऽयं यस्तिष्ठन्मूत्रयति अब्राह्मणो यस्तिष्ठन्भक्ष
यति जातिहीने संदेहादुरुपदेशाच्च ब्राह्मणशब्दो वर्त्तते संदेहात्तावद्गौरं शुच्याचारं पिंगलं क
पिलकेशं दृष्ट्वाध्यवस्यति ब्राह्मणोऽयमिति ततः पश्चादुपलभते नायं ब्राह्मणः अब्राह्मणोऽयमि

मा०

ति निर्ज्ञातं तत्र संदेहाद्ब्राह्मणा शब्दो वर्त्तते। ज्ञाते कृतार्थस्यानिवृत्तिः दूरूपदेशात् दूरूपस्थि-
तस्य भवति अस्तु ह्यत्रावकाशे ब्राह्मणा ब्राह्मणानयेति। तत्रागत्वा यं पश्यति तं मध्यवस्य ब्राह्म-
णोऽयमिति ततः पश्चादुपलम्भनेनायं ब्राह्मणोऽब्राह्मणोऽयमिति निर्ज्ञातं तस्य भवति॥ तत्र दू-
रूपदेशात् ब्राह्मणा शब्दो वर्त्तते। ज्ञाते — कृतार्थस्य निवृत्तिरागतस्य संदेहाद्दूरूपदेशाद्धि
न ह्ययं कालेमाषराशिवर्णमापाण्या आसीने दृष्टाऽध्यवस्यति ब्राह्मणोऽयमिति ततो निर्ज्ञाते
तस्य लवति। एवं देवदत्तेऽपि भूयस्तत्र रूपदार्थाभावे न मतिसंदेहो न भवति॥ किं अनेकमिति
किमत्र संदेहात् एकवद्वचनेकत्वं तु नरेकस्य प्रतिषेधेव बहूनां संप्रत्ययः स्यात्॥ इह स्व-
यं गुणा गुणो ततः पश्चान्निवृत्तिं करोतीति यथा। आशय शाय य॥ मोजय। अनेकमिति य-
था पितावदन्नेन छकानेवाल्कं पत्रेतुल्ये लुक्रियागुणो ग्रहणेनेन तत्र कथमनेकमिति दृष्टीनीति भ-
वति वैवला अपेक्षानामन्यकस्य प्रतिषेधेन बहूनां संप्रत्ययः स्यात्॥ तद्यथा नन एकं प्रियं न

317

राम

२१३ 49

नएकं मुखमिति इह ब्राह्मणाल मब्राह्मणो ना पर लान लब्ध नलौ शा पुनः तत्र को दोषः स्वरे दोषः
स्यात् । अब्राह्मणाल मित्येवं स्वरः प्रसज्येत । अब्राह्मणाल मिति चेष्यते । नञ्समासे भाव वचन
इति । किमुक्तं लब्ध नल भ्यां नञ्समासः पूर्वविप्रतिषिद्धं लब्ध नलौ लोः स्वर सिद्धार्थमिति नञ् ॥
ईषदकृता ॥ ॥ ईषद्गुणवचनेनेति वक्तव्यं ॥ अकृतोपि ध्यमाने इह च प्रसज्येत । ईषद्र
मि इह च न स्यात् । ईषत्कडारः इति । ईषदर ॥ षष्ठी ॥ कृद्योगे च । कृद्योगा च षष्ठी समस्यत
इति वक्तव्यं । इध्मप्रव्रश्चनः । पलाशशातनः ॥ किमर्थमिदमुच्यते प्रतिपद विधाना च ष
ष्ठी न समस्यत इति वक्ष्यति तस्यायं पुरस्तादपकर्षः का पुनः षष्ठी प्रतिपद विधाना का कृद्यो
गा सर्वा षष्ठी प्रतिपद विधानां शेषलक्षणां वर्जयित्वा कर्तृकर्मणोः कृति इत्येषा षष्ठी कृ
कृद्योगा । तत्र स्थे शुश्रु च लोः । तत्र स्थे स्यु च लोः षष्ठी समस्यत इति वक्तव्यं ॥ ब्राह्मणवत्सिनी इह न
गन्धः । परे रुहशब्दः । नद्यां घोषः ॥ तत्पुरुष सिद्ध्यतो रिति वक्तव्यं ॥ इह मा भूत घनस्य मोशो गंधः ॥ द

भा०

दनुस्यगंयोग्भृद्धौरिति किमर्थमिदमुच्यते गुणो न नेति प्रतिषेधं वक्ष्यति तस्यायं पुरस्तादपकर्षः । किं पुनः कारणं गुणो न नेत्युच्यते न पुनर्गुणो वा न नेत्युच्यते नैवं शक्यमिह हि यथा स्यान् काकस्य कार्ष्ण्यं बलाकायाः शौक्ल्यमिति । एतदेव खल्वपि तस्मिन्योगे उदाहरणम् । [illegible] ह्मणस्य शुक्लाः । दद्घलस्य कृष्णाः असामर्थ्यादत्र न भविष्यति । कथमसामर्थ्यं सापेक्षमसमर्थं भवतीति वृत्त्यमत्रापेक्षते रक्ताः । तस्मान्न गुणो न नेति वक्तव्यं गुणो न नेत्युच्यमाने [illegible] ऽपि गुणो रिति वक्तव्यं । षष्ठी । न निर्धारणे । इति प्रतिषेधानाव प्रतिप्रसवविधानाव षष्ठी । न समस्यतेति वक्तव्यं । इह मा भूत् [illegible] ने मधुनो ह्लाने ।। निनि । दरणा गुणा सुहि ।। गुणो किमुदाहरणं ब्राह्मणस्य शुक्लाः दद्घलस्य कृष्णा इति [illegible] असामर्थ्यादत्र न भविष्यति । कथमसामर्थ्यं सापेक्षमसमर्थं भवतीति वृत्त्यमत्रापेक्षते रक्ताः । तु तर्हि काकस्य कार्ष्ण्यं [illegible] बलाकायाः शौक्ल्यमिति इदं तर्ह्युदाहरणं ब्राह्मणा

318

राम

३१८

स्य मुलाः । वृषलस्य कृष्णाद्यं इति न नु वोक्त समासामर्थ्याद्दिन्न न भवित्यानि कथं च समासमर्थ्यं सा
पेक्षस्य समसमर्थं भवतीति द्व्यमत्रापेक्षते ई नाद इति नैव दोषः । भवति वैकस्य विदर्था
प्रकरणाद्यपेक्षणि । ज्ञानेन दावृत्तिः प्राप्नोति मनिकि सुदाहरणं । ब्राह्मणस्य पक्षस्य
ब्राह्मणस्य पक्षमाणः । नेतदस्ति वृत्ति विषये नश्च षष्ठी लङ्घ योगे नेति याव च्छू प
ते । एषा वा व्याख्या थ समपेक्षस्य भवति निनना सामर्थ्यान्न नाविध्यानि कथं समासमर्थ्यं सापे
क्ष समसमर्थ्यं भवतीति । द्व्यमत्रापेक्ष्य ने तु ईदनः । ईदन्ताहि वो रस्याद्दिव नु । वृषलस्याद्दिव
नू न नु या त्रापि वृत्ति विषये नैवस्य मे न न । दिवं राज्नुवन्नवनमिति । अथ्या वा किमुदाहर
णं ब्राह्मणस्याच्छेदः । वृषलस्य नीर्थः इति । नैतदस्ति । असमासमर्थ्याद्दिन्न न भविध्यानि क
थं समासमर्थ्यं सापेक्षं मवति समर्थं भवतीति द्व्यमत्रापेक्षते । आसमने ईद्न्ताहि ब्राह्मण
स्य रूवो । वृषलस्य च्छेदेति एतदपि नास्ति वृत्ति विषये न ज्ञष्ठी असमयप्रयोगे ने

भा०

तिपादवृत्त्युपन्यस्यावासार्थ्यमपेक्षमवतिष्ठते। सामर्थ्ये च भविष्यति कथं समासामर्थ्यं
सापेक्षं समर्थं भवतीति इत्युच्यमत्रापेक्षते केन टः। इदं ताहि पुराहृ[?]स्य स्यादेत्रो राघेयः ननु वाक्ये
पि प्रतिषिध्यते व्यपेक्षमिति तित्त्वावस्थानेन न। अव्ययप्रतिषेधेनो सुष्ठुसुनोरप्रति
षेध इति समानाधिकरणे किमुदाहरणं राज्ञः पाटलिपुत्रकस्य सुकस्य माराशिविदस्य
पाणिनेः सूत्रकारस्येति न ह्यस्ति अत्र सामर्थ्याहित्वेन भविष्यति। कथं समासामर्थ्ये समाना।
धिकरणे समसमर्थ्ये च द्वावागिति इदं ताहि सर्पिष्वः पीयमानस्य यजुष्कः क्रियमाणस्य। ननु
वाक्ये अप्यसामर्थ्यादेव न भविष्यति। कथं समसामर्थ्ये समानाधिकरणे समर्थ्ये वृद्धवती
ति। अप्रधानत्वमिति हि न स्मिन्न्येव न न॥ कस्मिन् शोभनं वा॥ कथमिति हि विज्ञायते॥ कर्मत्वं तिप्यायपष्ठी
मानसमस्यत इति। आहो स्वित् कर्मणि वापरः कृद्योगे तः संदेहः नु भयेष्वपजं नत्रान्यतरस्यां। रय
कं विशेषयति तु कथं अत्र विशेषः। कस्मिन्निति षष्ठी निर्देशाच्छूरकत्रीत्विकित्नासमासव

319

372

४५

वना। कर्म्मणीति षष्ठीनिर्द्देशश्चेत् कर्त्तरि कृता समासो वक्तव्यः। इध्मप्रव्रश्चनः पलाशशाता
तनः। तत्कोऽभावानर्थकः प्रतिषेधः। अपां स्रष्टा कर्म्मणि मेवासिद्धे। अस्तु तर्हि कर्म्मणि
यः। अ इति किमुदाहरणं ब्राह्मणस्य सुक्तं वृषलस्य पीतमिति। क निर्द्देशो समर्थत्वात्प्रति
षेधः। अनर्थकः प्रतिषेधो प्रतिषेधः। समासः कस्मान्न भवति। असामर्थ्यात्। कथमसाम
र्थ्यम्। सापेक्षमसमर्थं भवतीति। इध्मप्रव्रापेक्षे ओदनः। प्रतिषेध्यामिति चेत्कर्त्तरि षष्ठीप्रतिषे
धः। अथैवं मतिः प्रतिषेधः कर्त्तव्य इति इष्यते। कर्त्तरि षष्ठीप्रतिषेधो वक्तव्या स्यान्न। ब्राह्म
णस्य जानन्निति। पूजायां वा प्रतिषेधानर्थक्यं पूजायां वा प्रतिषिद्धो नर्थकः॥ राज्ञां पूजितः।
कर्म्मणीमेवासिद्धं तस्मादुभयप्राप्तौ कर्म्मणि षष्ठ्याः प्रतिषेधः। तस्मादुभयप्राप्तौ क
र्म्मकर्म्मणीमेवं यावत् षष्ठी नस्याः प्रतिषेधो वक्तव्यः। न तर्हि वक्तव्यः। न वक्तव्यः। इष्टमर्थोऽयं वा
पाठितः। कर्म्मणीति च कर्म्मणीमेवं यावत् षष्ठी कर्म्मणीति॥ नित्यं क्रीडाजीविकयोः॥ किमिहनि

भा०

न्यग्रहणेनाभिसंबध्यते॥ विभाषितो ह्यतिश्चेति षेधा॥ विभाषितेर्माहा॥ कुत्र एतन्न॥ विभाषितेर्हि विभा
षाणि त्पः प्रतिषेधो निर्मे॥ कुगतिप्रादयः॥ प्राद्धिद्धुस गोकमिश्रव वनीयानो प्रतिषे
धो वक्तव्यः॥ वृ सं प्रतिविषयोतनेविषृतः॥ साधुर्देवस्तोमानेर्द्धिजा॥ प्रवेतप्रतिषेधश्च॥
प्रवेताना प्रतिषेधो वक्तव्यः॥ स्थामे ह्रीरिङ्कहरिमिर्यापाहि॥ सिंह्वनुघारः स्वमितृग्गनिवर्द्धना
ता॥ सिङ्कमेनतकंष्ठी॥ धाङ्. विनिरुग्रनपः समस्यत इति विकल्पे॥ कुब्राह्मणः॥ कुवृषलश्च कु
आढ्यः॥ आकडारः॥ आपिंगल आढ्या॥ सुसुब्राह्मणः सुवृषलः सु॥ अति॥ अतिब्राह्मणः।
अतिवृषलः॥ अतिदूरा दुर्वृषलः॥ दुर्गति॥ प्रकारकः॥ प्राणायकः॥ प्रसेवकः॥ ऊरीकृत्य।
ऊरीकृत्य॥ प्राद्यः ते नार्थे प्राद्यः कार्थे समस्यन्त इति वक्तव्यं प्रगतआचार्यः प्राचार्यः प्रान्ते
वासी प्रपितामहः एतदेवं तमहः एतदेवं सोनगे विसृतर्के नापत्नितः। स्वतोपज्ञातयो॥
स्वतोपज्ञायाभि निवक्तव्या॥ सुराजा अति राजा॥ दुर्निद्रायां दुर्निद्रायामिति वक्तव्या॥ दु

राम

३२

५०

320

धु॰ नाड्युर्गका ॥ आऽ॰ घस्थौ ॥ आद्य॰ पस्थ इति वक्रकर्त्री ॥ आक॰ डारा ॥ आपिंगला ॥ न्तुः पापार्थे
कुः पापार्थि इति वक्रकर्त्री ॥ कुर्वान्यं सा ॥ कुः खल॰ ॥ आद्योगनाघर्थे अथमया ॥ अथस्पया सम
स्पंन इति वक्रकर्म ॥ छगन ॥ आबाधि॰ ॥ शनेवासी ॥ पितामह ॥ अमा॰ द्य॰ क्रान्ता घर्थौ द्वितीय
या ॥ अमा॰ द्य॰ क्रान्ता घर्थे द्वितीयया समस्पंन इति वक्रकर्त्री ॥ अति क्रान्ता॰ षडामजिखड॰ ॥
अनिमाल॰ ॥ आवाद्य॰ कुष्ठाघर्थे तृतीया ॥ अवाद्य॰ कुष्ठाघर्थे चतुर्थ्या समस्पंन इति व
क्रकर्त्री ॥ अवकुष्ठः॰ कोकिव यावमेन॰ ॥ अवकोकिल॰ ॥ पर्याद्योलाना घर्थे चतुर्थी ॥ पर्या
द्योलाना घर्थे चतुर्थ्या समास्पंन इति क्रकर्त्री ॥ परिक्षा नो ध्ययनाय पर्यध्ययनः ॥ निराद्य॰ क्रां
ता घर्थे पंचम्या ॥ निराद्यः॰ क्रान्ता घर्थे पंचम्या समस्पंन इति वक्रकर्त्री ॥ निष्क्रान्त॰ कौशांब्याभि
ष्कौशांबि॰ ॥ अव्ययं पदं वक्ष्याद्यभि॰ सह समस्पंन इति वक्रकर्त्री ॥ एकुन॰ स्थ
द्वाहि मंचजि ॥ पुनर्गवेन्तुना॰ सुखे ॥ द्वेन विभक्त्यलोपः॰ पूर्वपदस्य कजिस्वरलक्षण ॥ वासमासोऽद

म०

वाक्यमेश्वाऽऽरात्रवतातिऽगगतिमतावाव्ययंसमस्यतेइतिवक्ष्यमाणानुव्यवृत्तेः ॥ आकरोतीत्यत्र
रियंति । कुमति । उपपदसमतिङ्‌ऽ अति ङ्‌ । तिकिमर्थं कारकोव्रजति अभि ङ्‌ । तिशाकामवक्तुं कस्मा
न्नभवति । कारकोव्रजति । सुप्सुपेतिवर्त्तते ॥ अनन्तरपठितो उपपदसमासे ङ्‌ । तिनर्द्दिष्टं र्थस्याय
श्चतिषेधः । कस्मात् ङ्‌ऽर्थस्य णकारकोगतः । कारकोयातः । नैतच्छिद्यावाविधिं नार्हं इत्यत्राविद्य
द्ग्रहि कारकस्य गोतिः कारकस्योऽप्येति । एतन्नरपि इव्यवा विकथं कृदभिहितो भावो द्रव्यव
द्भवतीति । एवं तर्हि सिद्धे सति यत्प्रतिङ्‌ग्रहणं तिबंधं शापितं नरज्ञापयात्सा वाधः । अनयोर्योगय
र्निवृत्ते सुप्सुपेतिकिमेतस्योदाहरणे प्रयोजनं । गतिकारकोपपदानां कृद्भिः समासो भवतीति
न्येषां परिभाषानकर्तव्या भवति । यद्येतन्न ज्ञा । यतेकेनेदानीं समासो न भविष्यति । समर्थेन
प्रधे वं धातूपसर्गयोरपि समासः प्राप्नोति । पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेनेति
नैतदस्ति पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण साधनं हि क्रियां निर्वर्त्तयति तामुपसर्गो

३२१

राम

३२२

४१

विशिष्टानिष्टिश्रमितिनिर्वृत्तस्य वार्थस्योपसर्येणा॥ विशेषः शब्दोवक्तुं॥ षष्ठीसमासादुपपदसमासो
विग्रहनिषेधेन॥ षष्ठीसमासादुपपदसमासो भवति विग्रहनिषेधे॥ षष्ठीसमासस्यावकाशः॥
राज्ञः पुरुषो राजपुरुषः॥ उपपदसमासस्यावकाशः॥ लिबरमाः॥ कर्मण्यपः॥ इहोभयप्रसङ्गे नि
मकारो नगरकाः॥ उपपदसमासो भवति विग्रहनिषेधेन॥ नवा षष्ठीसमासाभावादुपपदसमासः॥
नवार्थो विग्रहनिषेधे नकिं कारणं॥ षष्ठीसमासस्याभावादुपपदसमासो भविष्यति॥ गतिक
रकोपपदानां कृद्भिः सह समासवचने उपपदसमासो भविष्यति॥ अनेनैव यथा स्यात्॥ नेनमासृ
हिति कथ्यात्र विशेषस्तेन वास्यात्॥ हेनेनवा उपपदसमासो नित्यसमासः षष्ठीसमासः पुनर्विभा
षानतु वनित्यं पः समासः स वि नित्यसमासः॥ यस्याविग्रहो नास्ति नेत्याह॥ नित्या प्रकारेय
समासः स नित्यसमासः॥ नैवं शक्यं॥ अव्ययीभावो ऽपि नित्यसमासः॥ तावत् सदोनतस्याविग्रहः॥
समासो नित्यसमासः॥ यस्याविग्रहो नास्ति॥ ग्रामेवावृयेन॥ एवकारः किमर्थः॥ नियमार्थः॥ नेन

६२

पाव नं यक्तस्तु त्वनेति सि समासवचने नासावयवजाति भावात् षष्ठीसमासः यदा न षष्ठीस
मास ५

भा०

द्वित्वप्रयोजनं। सिद्धे विधिरारभ्यमाणो ऽन्तरेणापि वकारं नियमार्थो भविष्यति। इह तर्हि व्याकरणा
र्थः। न हि भविष्यति। एवं तर्हि विज्ञायते। आमेवाव्यये न त्विमेवं ज्ञायि आमाव्यये नैवेति। अस्ति
वेदाने कश्चिद्वदनव्ययमनूराद्धः वदर्थो विधिः स्यात्। अस्तीत्याह। स्वराध्यायप्रमाणात् कुलमि
ति। नेन द्वाल्पिप्रयोजनं। अन्तरेणापि ग्रहणमारो भविष्यति। इदं तर्हि प्रयोजनमनेषयन्तुल्य
विधानमुपपदं तत्र यथा स्यात्। अमा वा येन च यत्तुल्यविधानं तत्र मा भूदिति। अग्रे भोजं अ
ग्रेतुक्ता। अग्रादिषु शास्त्रविधेः समासप्रतिषेधं वोदयिष्यति समनवक्ता भवति। अमेवाश्रे
बा बहुव्रीहिः। शेषग्रहणं तु व्यानेकः शेषो नाम सुपदानामनुक्तः समासः सशेषः। शेषवचनं पद
नष्ट्वा मा वानि। शेषावचने पदनष्टे त्वकिं कारणं। अमा वा न तर्हि संपिनानि पदानि येषां
पदानामनुक्तः समासः। अर्थनिपातनाद्धि शेषग्रहणं येषां तत्र ननुक्तः समासः स शेषः। अर्थ
नष्टद्विविशिष्टे। अथितनष्टेद्विशिष्टमेतद्भवति नुतः पदानि। न हि संबध्यायेषु तत्क्राः समा

राम

३२२

५२

मः । त्रिकनन्त्वाद्धि शेषग्रहणं । यस्य त्रिकस्यानुक्तः समासः स शेषः ॥ कस्य वाऽनुक्तः प्रथ
मायाः ॥ ७ इति द्वितीयस्या वा यथा यस्या द्वितीये पादे श्य समासा द्विकं ॥ ॥ अनेकमन्यपदार्थे प
दग्रहणं । किमर्थं अनेकमन्यार्थ इत्युच्यमाने वाक्यार्थेऽपि बहुव्रीहिः स्यात् ॥ यथा समानानन्था
मपि नामसु स्यान्नेमो इति पदग्रहणे पुनः क्रियमाणे न पदे ये भवति । अन्यग्रहणं । किमर्थं अने
कपदार्थ इति । उच्यमाने स्वपदार्थेऽपि बहुव्रीहिः स्यात् राज्ञः पुरुषः । तत्पुरुष इति । नैतद
स्ति शेषयोगे नन्तत्पुरुषः स्वपदार्थबाधको भविष्यति । भवेदेकसंज्ञाधिकारे सिद्धं परं कार्यमिति न तु ५
सिद्ध्यति । आरंभसामर्थ्यात् तत्पुरुषः परं कार्यं स्याद् बहुव्रीहिः शामोति परं कार्यत्वे च न दोषश्चे
ष इति वचने ने अशेषत्वान्न भविष्यति शेषवचनं तु कर्त्तव्यं तत्र चषववनो दोषः ॥ संख्यासमानाधि
करणा नञ्समासेषु बहुव्रीहि इति शेषाद् इति अथैकसंज्ञाधिकारे नार्थोऽन्यग्रहणेन एकसंज्ञा
धिकारे च कर्त्तव्यं । अक्रियमाणे त्वन्यग्रहणे पष्ठे च तत्पुरुषः स्वपदार्थे बहुव्रीहिं बाधते ॥ एव

मन्यपदार्थेऽपि बाधेतां ॥ अथानेकग्रहणं किमर्थमन्यपदार्थ इतीयत्युच्यमाने एकस्यापि पदस्य व
हुव्रीहिः स्यात् ॥ सर्पिर्घोऽपि स्यात् गोमूत्रस्यापि स्यात् नैतदस्ति शब्दपोलने स्तु सुपेति वर्तते द्वन्द्व
हिं शयोलने बहूनामपि यथा स्यात् सुसूक्ष्मजटकेशेन सुनताजिनवाससा ॥ अन्यपदार्थे वानेकग्रह
णं कर्तव्यं ॥ चार्थे द्वन्द्वः ॥ अनेकमिति द्वन्द्वोऽपि यथा स्यात् प्लक्षन्यग्रोधखदिरपलाशा इति एतदपि
नास्ति शयोलनं ॥ आचार्यप्रवृत्तिर्ज्ञापयति बहूनामपि समासो भवतीति यदयं तत्पुरुषे
द्विगुं शास्ति न ह्यन्तरेणापि न हि बहूनां शास्तीति ॥ ग्रहणेन तत्पुरुषे ... ते तेन बहूनां न भवि
ष्यतीति अन्तरेण न रेषपठति अनेकवचनमुपसर्जनार्थं अनेकग्रहणं क्रियते । उपसर्जनार्थं इत्यथ
मानि द्विष्ठं समासमुपसर्जनमिति उपसर्जनसंज्ञा यथा स्यात् चित्रगुः शबलगुरिति ॥ नैकवि
भक्तित्वात् ॥ न वा एतदपि प्रयोजनमस्ति किं कारणमेकविभक्तित्वात् एकविभक्ति वा पूर्वनि
पातनं सुपसर्जनसंज्ञा भविष्यति ॥ चित्रगुः शबलगुरिति चित्रायस्य गावः ष्टित्रगुस्तिष्ठति ॥ चि

राम

त्रायस्य गावश्चित्रगोरात्रय चित्रायस्य गावश्चित्रगोः स्वं। चित्रायस्य गावश्चित्रगौ निधेहि। चित्रा
यस्य गावश्चित्रगाविति प्राप्नोति हि कुतस्थुरेव नाहि किंचित्प्रयोजनमस्ति तस्य एकविभक्तियोगः क्रियते
एतस्य एकविभक्तियुक्तमिहापि प्राप्नोति राजकुमारीतत्र ककुमारीतिष्ठन्ति। राज्ञो पाकुमारी रा
जकुमारी पश्य राज्ञो पाकुमारी राजकुमार्याः कृते राज्ञो पाकुमारी राजकुमार्यै हि राज्ञो पा
कुमारी। राजकुमार्या आनय राज्ञो पाकुमारी राजकुमार्याः स्वं राज्ञे पा राजकुमारी राजकुमार्यां
निधेहि राज्ञो पाकुमारी राजकुमारीति एकविभक्तियुक्तमेव यत्र त्यन वै नेनित्यमेकविभक्ति
युक्तमेव राज्ञः कुमारीं पश्य राजकुमारीं पश्येत्यपि भवति। किं वक्तव्यमेतत्॥ नहि कथमनुच्यमा
नं गंस्यते एकग्रहणात्सामर्थ्यान्नभयादि हि यदेकविभक्तियुक्तं वानेकविभक्तियुक्तं वा तत्रास्यादेक
ग्रहणमनर्थकं स्यात्। विभक्तियुक्तं पूर्वं चेन्निपातन इत्येव ब्रूयात् नपराथाभिधाने तु प्रयोगानुपपत्ति
रभिहितता नापराथाभिधाने प्रयोगस्यानुपपत्तिः चित्रगुर्देवदत्तः किं कारणं अभिहितत्वात्।

भा०

चित्रगुत्वाभिहितः सोऽर्थ इति कृत्वानुप्रयोगो न शक्यो ऽभिधानवानभिहितत्वात् न वा एष दोषः । किं का
रणं । अनभिहितत्वात् चित्रगुशब्देनानभिहितः । सोऽर्थ इति कृत्वानुप्रयोगो भविष्यति कथमन
भिहितः । यदिदानीमनेकपदार्थाभिधानेनुप्रयोगानुपपत्तिरभिहितत्वादिति सामान्याभिधाने
हि विशेषानभिधानात् सामान्येऽभिधीयमाने विशेषोनभिहितो भवति तत्रावश्यं विशेषार्थि
ना विशेषोनुप्रयोक्तव्यः । चित्रगुः कः देवदत्त इति । भवेत्सिद्धं यदा सामान्ये
वृत्तिः यदा तु खलु विशेषे वृत्तिः तदा न सिध्यति चित्रगावो देवदत्तस्येति चित्रगुर्देवदत्त इति तदा
पि सिद्धं कथं नेमुभय युगपद्वृत्तिर्वाक्यं समासश्च यदा वाक्यं न तदा समासः यदा समासो न
तदा वाक्यं यदा समासः सामान्येन वृत्तिस्तत्रावश्यं विशेषार्थिना विशेषोनुप्रयोक्तव्यः चित्रगुः कः देव
दत्तः सामान्यस्यैव तर्ह्यनुप्रयोगो न प्राप्नोति चित्रगु तत चित्रगु किं विचित्रगु सर्वमिति सामान्य
पि यथा विशेषस्तद्वत् तत्र चित्रगुः ... संदेहः स्यात् सर्वं वा विशेषं वेति तत्रावश्यं विशेषार्थिना विशे

न
दे
राम

३३४

चिशे१

५४
५५

विभक्त्यर्थाभिधाने द्रव्यस्य लिंगसंख्याभ्यामुपचारोनुपपन्नः

चोनुपपद्यतेन्यत्र। अथवा विभक्त्यर्थेभिधीयते। एतच्चात्र युक्तं यद्विभक्त्यर्थेभिधीयते तत्र हि सर्वप्रत्ययान
र्दं वं वर्न्नते। अस्येमिं विभक्त्यर्थाभिधाने द्रव्यस्य लिंगसंख्याभ्यामुपचारोनुपपन्नः। बहुपटवः बहुपटवा
बहुपटवः। बहुपटवः। बहुपटवौ बहुपटवा इति कथं ~~...~~ अपर आह। विभक्त्यर्थाभिधाने द्रव्यलिंग
संख्योपचारोनुपपन्नः। विभक्त्यर्थाभिधाने द्रव्यस्य ये लिंगसंख्ये ताभ्यां विभक्त्यर्थस्योपचारोनु
पपन्नः। बहुपटवः। बहुपटवः। बहुपटवौ बहुपटवा इति कथं येन द्रव्यस्य लिंगसंख्याभ्यामन्यस्योपचारः स्या
त् सिद्धं तु यथा गुणवचनेषु सिद्धमेतत् कथं यथा गुणवचनेषु नाशब्दानामाश्रय-
तो लिंगवचनानि भवन्ति। तद्यथा शुक्लं वस्त्रं शुक्ला शाटी शुक्लः कंवलः शुक्लौ कंवलौ शुक्लाः कंवला
इति यदसौ द्रव्यमाश्रितो भवति स गुणः तस्य यल्लिंगवचनं तद्गुणस्यापि भवति एवमिहापि यदसौ द्र
व्यमाश्रितो भवति विभक्त्यर्थस्तस्य यल्लिंगवचनं तत्तस्यापि भविष्यति यदि तर्हि विभक्त्यर्थो
भिधीयते कुतः पदार्थः कथमभिहितो भवति द्रव्याः सलिंगाः ससंख्याश्चार्थग्रहणात् सामर्थ्या

बहुपटवं बहु
पटवोप

भा०

ग्रहहानेकमभ्युपद्दनीय एनामिद्धं कथं पुनापरेनामर्थात्रिस्यान्नश्शाक्वोघेषःशावे असंभवादर्थेकार्य
विज्ञास्यते सोघमेवं सिद्धेम तियद्दृष्टेग्रहणाकरोति जस्पेन श्रयोजनं कृत्स्नःपदार्थोयथा सत्ताविधी
यत्र सद्दृश्व्यः सलिंगाः ससंख्याः श्रुतिपर्यायेहि कृत्स्नःपदार्थोभिधीयते लेमःसांख्याच्छविधयो न
सिध्यतितत्रकेयाविकिमुक्तं सिद्धं तु द्विपाःश्रुतिपदिकविशेषणत्वात्॥ स्वार्थे [illegible]टावादव्यदृतिसं
ख्येय [illegible]एकमोकिमुक्तं कर्मादीनामनुक्ताएकत्वादयइतिकृत्वा संख्याभविष्यतिप्रथमातेहि
नप्राप्नोति समयाद्दविष्युतिय दिसामान्यिकीननियोगतः अ[illegible]प्राःकस्मान्न वेजिकर्मा
दीनामभावात् षष्ठी तर्हि प्राप्नोति शेषलक्षणाषष्ठी[illegible] अशेषत्वान्न भविष्यतिएवमपिव्यति
करः प्राप्नोति एकस्मिन्नपि द्विवचनबहुवचने प्राप्नुतः द्वयोरप्येकवचनबहुवचने बहुष्वप्ये
कवचने अर्थतो व्यवस्था भविष्यति अथवा संख्यानामेयं परस्वधानि सत्त्वेयमनयाविशेष्य
द्विवाचन प्रथमा न स्यात् संख्योपविशेषितं स्यात् अथवावसान्येततत्ववचनग्रहणात्स्यप्रपो

राम

३३५

द्विवचने २

३२५

५५

नंतृत्रेोष्टप्येकस्यारिषुप्रथमायथासमानाएवमपिषष्ठीप्राप्तोतिकिंकारणं।व्यभिचरत्येवबह्वयंस
मासोलिंगसंख्येषष्ठ्यर्थेपुनर्नव्यभिचरतित्रिभिर्हिनःसोर्थोनिर्दिष्टःशान्तिपरिकार्थःसंपन्न
स्तत्रशान्तिपरिकार्थेप्रथमेतिप्रथमानभविष्यतिनतर्हीदानीमिदंभवतिविग्रहोर्थेवृहन्नस्येति।
भवतिवाक्यमर्थमपेक्ष्यषष्ठीपरिगणितांकर्तव्यं।बहुव्रीहिःसमानांधिकरणानांसमानां
धिकरणानांबहुव्रीहिःकर्तव्यः।किंप्रयोजनंव्यधिकरणानांमाभूदितिपंचभिर्भुक्तमस्ये
ति।अव्ययानांच।अव्ययानांबहुव्रीहिर्वक्तव्यः।उच्चैर्मुखः।नीचैर्मुखः।सप्तम्युपमानपूर्वपद
स्योत्तरपदलोपश्च।सप्तमीपूर्वस्योपमानपूर्वस्यचबहुव्रीहिर्वक्तव्यः।उत्तरपदस्यचलोपोव
क्तव्यः।कंठेस्थाःकालाअस्यकंठेकालः।उष्ट्रमुखमिवमुखमस्यउष्ट्रमुखः।खरमुखः।समुदा
यविकारषष्ठ्याश्चसमुदायविकारषष्ठ्याश्चबहुव्रीहिर्वक्तव्यः।उत्तरपदस्यचलोपोवक्तव्यः।के
शसंघातश्चूडाअस्यकेशचूडःसुवर्णविकारोलंकारोस्यसुवर्णालंकारः।प्रादिभ्योधातुजस्य

अपलाशः नञोऽस्त्यर्थानां २

भा०

प्रादिभ्यो धातुजस्य बहुव्रीहिर्वक्तव्यः। उत्तरपदस्य च लोपो वा वक्तव्यः। प्रपतितपर्णः प्रपर्णः। प्र
पतितपलाशः। नञोऽस्त्यर्थानां बहुव्रीहिर्वक्तव्यः। उत्तरपदस्य वा लोपो वक्तव्यः। अविद्यमान
पुत्रः अपुत्रः। अविद्यमानभार्यः अभार्यः॥ तत्र हि द्विबहुवक्तव्ये। न वा अभिधानादसमानाधि
करणो हि संज्ञाभावात्। न वा वक्तव्यं। असमानाधिकरणे नाव बहुव्रीहिः कस्मान्न भवति। एवमिस्तु
कस्येति अनभिधानात् तत्त्वावश्यमनभिधानमाश्रयितव्यं। क्रियमाणेऽपि परिगणने ऽप्य
भिधानेन न भवति न भवति तत्र बहुव्रीहिः यथा पंचभुक्तोऽस्येति। अर्थे तस्मिन्सत्यनभिधाने
ऽपरिगणनेऽपि परिगणनं क्रियते परिवार्त्ते परिगणनमपि कर्तव्यं। न कर्तव्यं। अर्थनियमे
मत्वर्थग्रहणं। अर्थनियमे मत्वर्थग्रहणं कर्तव्यं मत्वर्थे यः स बहुव्रीहिरिति वक्तव्यं। इ
ह मा भूत् कण्ठेस्थितमनेनेति तथा चोत्तरपदस्य च वचनार्थं। एवं वक्तव्यो नञ्योगस्य च वचनार्थं उपप
दो भवति केचिन्नावराहुः। पञ्चत्रिः सत्त इति संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये इ

राम

३३५

336

५६

अ३

पुंवत्तो ऽथ कर्तृवचने कथं ज्ञानमुद्दंकं चे प्राप्तोदको ग्रामः आगता अतिथयो ग्रामं आगतातिथिर्ग्रामः कर्तृवचने ना२

ति। अपरआहायद्वान्निकइति। कर्मवचनेनाऽप्रथमायाः बहुव्रीहिर्वक्तव्यः। ऊढो रथो येन ऊढरथोऽन
ड्वान्। उद्धृतमोदनः स्थाल्याः उद्धृतौदना स्थाली। उपहृतः पशू रुद्राय उपहृतपशुः रुद्रः। पादिकर्म
वचने चापि करणवचने नापि ति वक्तव्यं। अप्रथमाया इति किमर्थं वृष्टे देवे गतः। अथाप्रथमाया
इमुच्यमाने इह कस्मान्न भवति। वृष्टे देवे गते पश्येति वाहिरं गा। अत्रापि प्रथमायाः सुवधिकारे अनि
र्दिष्टो रात्रिवचनं सुवधिकारे निर्दिष्टो रे सुपसंख्यानं कर्तव्यं। अस्ति क्षीरा ब्राह्मणी। न वाव्ययत्वान्न
वा कर्तव्यं। किं कारणं। अव्ययत्वात्। अव्ययमेषो ऽस्तिशब्दः। नैषो ऽस्ति लेट्कः अव्ययं सुपसर्ग
विभक्तिस्वरप्रतिरूपकाश्च निपाता नाम वंती तिनि यान संज्ञा निपातो व्ययमिति व्ययसंज्ञा। अथ पि
सब्रह्मचारीति को ऽयं समासः बहुव्रीहिरित्याह। कोऽस्य विग्रहः। के सब्रह्मचारिणो ऽस्येति य एवं कंठ इति
प्रतिवचनं नोपपद्यते न्यपदेशेनान्यपदार्थे द्यो यदि एवं तर्हि एवं विग्रहः। कारिष्यते कोऽयं सब्रह्मचारीति प्र
तिवचनं वै एवं नोपपद्यते स्वरे च दोषो भवति। किं सब्रह्मचारीति एवं स्वरः प्रसज्येत। किं सब्रह्मचा

रिं सब्रह्मचारी२

भा०

रीति वेष्यते एवं तर्हि एवं विग्रहं करिष्यते कः सब्रह्मचारी किं सब्रह्मचारी तिभवेत् इति वचनमुपपन्नं स
रेहुदेशो भवति एवं तर्ह्येवं विग्रहं करिष्यते कः सब्रह्मचारी नवकिं सब्रह्मचारी यस्मिन्निति। अथवा पु
नरस्त्वयमेव केस ब्रह्मचारि ग्गोस्मोति न तु बोर्नोकेकठं इति शति वचनेनोपपद्यत इति नेष दोषः अ
ग्रो करवाणि न्यायेन भविष्यति। न यथा कश्चिदाह अग्रो करवाणि इति कुर्विति कर्त्र्यपि तु ज्ञाते क
र्मण्यनुज्ञातं भवति अपर आह अग्रो करिष्यति इति किं पटुः इति कर्मण्यपि तु ज्ञाते कर्त्र्यप्य
नुज्ञातं भवति। यथैव तर्ह्यपि के सब्रह्मचारी तोत्स्यतीति कठ इत्युक्ते संदेधा हे न हस्यते नूनम
यमपि कठ इति। एवं कठ इत्युक्ते संदेहात् हन्त्येनं नैतेपि कठा इति। न खल्वपि तेस समासेन श
क्यः प्रतिनिर्देष्टुं उपसर्जनं हि ते भवेति। अर्द्धपिप्पल्यादि इति कोयं समासः बहुव्रीहिरित्याह। कोस्य वि
ग्रहः अर्द्धं पिप्पल्या यस्य इति कः समासार्थः समासार्थो नोपपद्यते अन्यपदार्थो हि नाम समा
त्ति से योपदानां समासान्तोन्यस्य पदस्यार्थो नोपपद्यते। किं हि तयोरर्द्धं भवति अग्रकन लघुतयैमवधि

से १ योन्यपदार्थः एवं तर्हि एवं विग्रहः करिष्यते अर्द्धं तत्तीपमनयोरिति एवमपि कषयैर्यः यस्य

३३७

राम

ग्रहः। अर्द्धंतृतीयमेषामिति ननु वोक्तं समासार्थो नोपपद्यत इति नैष दोषः। आवयवेन विग्रहः समु

दायः समासार्थः। यथावयवेनपि ग्रहः समुदायः समासार्थः। अर्द्धद्वितीयोऽनुमसारपाण्डवांक

षा।। द्वितीयस्य बलकृष्णस्य वर्द्धं तां द्वयोर्द्धिवचनमिति नित्यद्विवचनं प्राप्नोति। अलकनर्थेयमेव विग्रहः।

अर्द्धं तृतीयमनयोरिति ननु वोक्तं षष्ठ्यर्थो नोपपद्यत इति नैष दोषः। इदं नावद्यं पञ्चषष्ठ्याः। अर्थेह

देवदत्तस्य भ्रातेति कः षष्ठ्यर्थ इति नैव गत्या न। एकस्मान्मातापितुर्भ्यां जन्म इति एतत् वर्त्ततेऽयथा सार्थिकोना

मेकपृतिश्च पञ्चषितानां शातकुम्भायतनिष्क्रानानां न कश्चिन्मरसंसारमिति संबन्धो भवति। एवंत

जोयके भ्रातृत्वं नाम अत्र वे युक्तः षष्ठ्यर्थो इहप्रनेइहापि युक्तो इहप्रतो इहनर्थं तदर्द्धं तृतीय एवाभाय

गामितुक्ते अर्द्धस्थानयनं न प्राप्नोति। अलकनर्थेयमेव विग्रहः। अर्द्धं तृतीयमेषामिति ननु वोक्तं

समासिद्धितीयोऽनुमसारपाण्डवांसंकर्षणा द्वितीयस्य बलकृष्णस्य वर्द्धं तामिति द्वयोर्द्धिवचनमि

तिद्विवचनं प्राप्नोति नेति नैष दोषः। अयं तो यान्तः शब्दोऽस्ति बहूराणामाजि सहायचावीतनस्येद्य

भा०

हत्वां । अस्ति द्वितीयः । अस्ति सहायमिति गम्यते । एवमत्र द्वियोगो पाठ्यः । एकस्मिन्नेकवचनं
प्राप्नोति एकार्था हि समुदायाः भवंति यथा शतं यूथं वनमिति । अत्रानर्थक्यमेवाविग्रहः ।
अर्द्धं नैतं । पसमनयोरिति जिनतुवोक्तम् । अर्द्धं नीयतां आनोतनयं नामि स्तुक्ते । अर्द्धं स्यात् । नयं वंत
श्रोत्रां । नीति नैष दोषः । भवति वृद्धी हेतद्धु । तत्त्वविज्ञानमपि न घटयत्वे तु कार्यां समसमा
नयत्तो हि नाम्नी षान्मस्विड्जः । श्रवणं श्रोतिनदुत । आनी यत्नेनद्दुतात्स्थ प्रवर्तते । अथवा पु
नरस्त्वयमेवाविग्रहः । अर्द्धं नैतं । नीयामे षामि जिनतुवोक्ते एकवचनं प्राप्नोतीति नैष दोषः ।
संख्यानामेव परत्वधाना संख्येयमनया विशेष्यं परिवार्यैकवचनं स्यात् ॥ संख्येयम
